आयुर्वेदसंबद्ध

संग्रह

(१३७)

फो - २

( ताम्बूलवल्ली )

ताम्बूलवल्ली नाम्ना स्वर्णीरकेतुर्विका । सोषधी महावीर्या
सत्वन्धकरी भवेत् " "

( तुम्बिनी )

तथान्या तुम्बिनी नाम नृपुष्पा नरुगामिनी । तुम्बिनीपत्र सदृशा मह
वल्ली पयस्विनी ॥ मुस्का सोषधी दिव्या वन्धिनी सा रसस्य तु " "

( वीरवल्ली )

वीरवल्ली तथा चान्या स्वर्णीरा महोषधी । श्रीफलस्य दलाकारा
सत्वन्धकरी भवेत् " "

( कन्या )

कान्ते द्वीदशभिःपत्रैर्मयूरङ्कहो धमैः । कन्दजा काञ्चन
क्षीरी कन्यानाम महौषधी " "

( सञ्जीविनी )

पीतकानि तु पत्राणि फलानि हरितानि वै । औषध्यश्च लता दिव्या रक्तचन्दनसन्निभा । रक्तानि चैव पुष्पाणि जाम्बूनदमयानि वै ॥ ॥

( वटपत्री ) (१२)

लता हरितवर्णाभा अतिसूक्ष्मा पयोन्विता । वटपत्रसमं पत्रं पुष्पं स्याद्रक्तसन्निभम् ॥ तस्या लंघनमात्रेण दिव्रोहोत्थ प्रजायते ॥ ॥

( वोगरी ) (१४)

शर्करा कन्दवत्पत्रं पुष्पं कार्पाशसन्निभम् । लम्बायमानं तत्पुष्पं फलं चालौकिके मतम् ॥ शाखां प्रतोड्य विप्रेन्द्र पुनः शाखां प्रदापयेत् । पुनर्वृक्षो भवेच्चैव चिकृष्टया तदीदृशम् ॥ ॥

( क्षीरकन्द ) (१५)

पत्रैः स्नुहिसमा स्निग्धा सपृभिर्हेमसुप्रभैः । भग्नमेनत्स्रवेत्क्षीरं रक्तवर्णं सुशोभनम् । मेघानान्तु निनादेन जायते रूपशोभिनं । वन्धनं रसराजस्य सर्वसत्ववशङ्करम् ॥ ॥

(ज्योतिष्मती)

ज्योतिष्मती नाम लता याचत्काञ्चनसन्निभा । वल्ली वितानवत्
ऊर्ध्वा हेमवर्णफला प्रभा ॥ ॥

(हरिद्रवत्सनाम) (१५)

सिन्धुवारसदृक्पत्रो वत्सनाभ्या कृतिस्तथा । यत्पार्श्वेन तरोर्वृद्धि र्वत्स
नाम: समाधित: ॥ ॥ हरिद्रातुल्यमूलो यो हरिद्र: स उदाहृत: ॥ ॥

( औषधीनां स्थानानि )

तेषां क्षेत्रन्तु विज्ञेयं गिरिकन्दरगह्वरे । पर्वतानांच शिखरे द्वीपेद्वीपे
ह्यवौ स्थिति: ॥ स्वयंभूतेषु लिङ्गेषु पर्वतेषु भवन्ति ता: । तुहिनाद्रौ परे चैव
प्रभूतास्तृणवज्र ता: ॥

नदीषु शैलेषु सरःसु चापि पुण्येष्वरण्येषु तथाऽऽश्रमेषु ।
सर्वेत्र सर्वा: परिमार्गितव्या सर्वत्र पृथ्वी हि वसूनि धत्ते ॥

( सर्वासां सामान्य फलम् )

महावीर्या महापुण्या सर्वकामप्रदायकाः। सर्वा विशल्याः ख्याता स्तथा शल्यहराः स्मृताः॥ बन्धानां घ्नत्रदाः ख्याताः शस्त्राणां चैव रक्षकाः। मधाज्यसहिता पीता वज्रदेहत्वकारकाः॥ क्षीरेच्छ वनिता लेपा न्पीता वज्रसमुच्छ्रयम्। पुत्रस्था वारयेत्कुक्षिं लेपा कल्पविनाशिनी॥ अमृतोपमा महौषधो लवमात्राः सुसिद्धिदाः। औषधीं चेक्षुयष्टि त्वा तु प्रथाज्येन लिहेत्क्षुधः॥ मासद्वयेन सिद्धस्तु महाबलपराक्रमः। महाकल्पाधिपो वीरः सुरासुरनमस्कृतः॥ नासां सेन संपुक्तो हेम्नाच विनियोजितः। अन्धमूषागतो ध्मातो वध्यते पारदो ननु॥ विधत्ते सर्वलोहानि कोट्यंशाद्धेमकारकः। तथा वक्त्रेन सूतेन पलेनैकेन दिव्यता। त्वग्दन्तनखराःकेशाः पूर्वजातिनवाः प्रभाः। दिव्यदेहत्वमाप्नोति महाकल्पाधिपोबली॥ एषां वीर्यमचिन्त्यस्तु तपसा पुण्यसंचयात्। प्राप्नुवंति नरास्तेषां तु दुष्प्राप्ता स्तपोवर्जितैः॥ प्राप्नुवंति महापुण्या शिवाराधनतत्पराः॥

गृहीतव्यास्तु ह्यौषधयः शक्तिनीजैः पृथक् पृथक्। यथा क्रमेण शक्तीनां फला औषधिरूपतः॥ संस्थिताः क्रमशो ज्ञेया गृह्णीयाद्बीजमात्रतः॥ अष्टम्यां च चतुर्दश्यां पौर्णिमायां तथैव च। सोमार्कौ ह्येथवा ग्राह्या पुष्ये हस्तेथ गृह्यते॥ व्यतिपाते गृहीतव्याः पूजयित्वा च मन्त्रितः। गृहीत्वा कारयेत्कर्म ह्यौषधीनां निशेवतः॥ ॥

( मासां विशेषफलम् )

( पद्मिनी )

तस्याः पत्राङ्कमादाय हरगौरीसमन्वितम् । मनःशिलानालयुक्तं माक्षिकेन समन्वितम् ॥ मर्दयेत्सप्तरात्रन्तु तेन शुल्वन्तु वेधयेत् । सहस्रांशेन देवेशि सिद्धं भवति काञ्चनम् ॥ ॥

( उक्तया )

सदृशं सर्वलोहानि सङ्कल्पेन विशिष्यते । काञ्चनं कुरुते क्षिप्रं शिवेन वह्निना ॥ मज्जयित्वांगुलीं तत्र लिहेदनुसकृन्नरः । निधानानिच सर्वाणि पश्यते नात्र संशयः ॥ मेधावी सर्वशास्त्रज्ञो बली पलितवर्जितः । प्रद्युम्नसदृशो रूपे शौर्ये च जायते नरः ॥ तस्यास्संग्रह कर्तव्यमत्र प्रमाणतः । विवेन्मधुघृतैर्युक्तं निद्रा भवति तत्क्षणात् ॥ स्वयं निर्गच्छते सिद्धिः सूर्यतेजसमप्रभः । त्राशयेच्च जगत्सर्वं सदेवासुरमानुषान् ॥ ॥

( वल्लीपलाश )

वल्लीपलाशमानीय ताम्रद्रोणे विनिःक्षिपेत् । तन्नाम्रं स्वर्णतां याति नात्रकार्या विचारणा ॥ ॥

( वटपत्री )

ददाति युगसंयोगं वटपत्रकसंयुतम् । शोधितो नीयते यत्र तत्र गच्छति नान्यथा ॥ विनेतुं च मतिं दद्यान्नोधितोपि न कृष्यति । स्व शिरश्छेदनमपि नैव जानाति विह्वलः ॥ ॥

( ब्रह्मदण्डी )

ब्रह्मदण्डास्तु मूलानि सहलिंगान्वितानि च । संग्रह्य पुष्यनक्षत्रे ध्यानस्तेन भावितम् ॥ खात्रे पात्रे प्रसातव्यं क्षीरणं हरितद्रावकम् । विलोहवेष्टितं मूलं वक्त्रस्थं गोपयेन्नरम् ॥ ॥

( क्षीरकन्द )

तस्य क्षीरन्तु संग्रह्य तारं निर्बीजके क्षिपेत् । अग्नेर्दृक्कणिनाचैव जायते हेम शोभनम् ॥ ॥

( हस्तज्योति )

तस्य मूलं समादाय क्षीरमध्ये क्षिपेन्नरः। तत्क्षणाज्जायते रत्नं न क्षीरं च क्षिपेत् बुधः॥ सप्तरात्रप्रयोगेण वली पलितवर्जितः। क्षीरेण नियताहारो नवरात्रादि वर्जयेत्॥ द्विरष्टवर्षो कारश्च जीवेद्वर्ष सहस्रकम्। माहिषी नवनीतेन तस्या मूलन्तु घेषयेत्॥ कपिलाज्यप्रदीपं च गृहपालेन कारयेत्। शिवालये शुचिर्भूत्वा ग्राह्येत्कज्जलं बुधः। कृष्णा सप्तमी चतुर्दश्यां पूजां कृत्वा विधानतः। तेनैवाञ्जितमात्रेण हृष्टश्यो जायते नरः॥ तस्याः मूलंतु संग्राह्य सूक्ष्मं चूर्णानि कारयेत्। अजक्षीरं समादाय मिश्रीकृत्वा विधानतः। कपिलाघृतसंयुक्तं कज्जलं पातयेद्बुधः। तेनाञ्जनात्रेत्रयुगे हृष्टश्यो जायते नरः॥ तस्य मूलंतु संगृह्य तत्समं रसगन्धकम्। मातुलुंगरसेनैव एकीकृत्वा च मर्दयेत्। लेपयेत्कुल्यपत्राणि त्रिपथक्रमशोभनम्॥ ॥

(वज्रवल्ली)

तद्रसं तु समादाय पारदं निक्षिपेत्सुत। एवं दिनत्रयं सूते रसं दत्वा खलेदृढम्॥ मूषिकायां ततोग्निं च दापयेद्यत्नतः सुत। पारदो मृतिमायाति नात्रा चिन्तामणिर्मतः॥ रसिकायोऽथवा तु ताम्बूले भक्षयेत्सुत। स्त्रीसहस्रं तु संगच्छे त्साक्षात्कामोभवेन्नरः॥ तं पारदं समानीय धातुलक्षप्रतोलके। लक्षवेधी भवेद्विप्र नात्रकार्या विचारणा॥ ॥

(वोगरी)

तत्फलं तु समादाय गृह्णीयात्तद्रसं नरः। तद्रसे खलनं कार्यं पारदस्य त्रियामकम्॥ तं पारदं मूषिकायां दत्वाग्निं दापयेत्सुत। मूषिकाग्नि प्रतापेन पारदो मृत्युमाप्नुयात्॥ तस्य संभक्षणात्सुत्र कामस्त्री भवेद्ध्रुवम्। प्रतिदिनता भविष्यन्ति कृष्णाकेशी भवेत्सुत। धातुमात्रेपारदं तं लक्षवेधी भवेद्ध्रुवम्॥ तत्फलस्य रसं गृह्य नाग्रद्रावे विनिक्षिपेत्। तत्ताम्रं जायते शुद्धं स्वर्णं जाम्बूनदप्रभम्॥ ॥

## ( हरिद्रवत्सनाभ )

हरिद्रवत्सनाभंतु समानीय प्रयत्नतः । नाम्रमध्ये दधेच्चूर्णं नाम्रं स्वर्णतामियात् ॥ हरिद्रवत्सनाभस्य सेपूर्णस्य रसं चरेत् । पारदंतु समानीय दृढंतु खलेने खलेत् ॥ एकविंशद्दिनं कृत्वा वज्रो भवति पारदः । तस्य संधारणाद्विप्र विन्नरो भुवि जायते ॥ ॥

( मूलिका ग्रहण विधि. )

अभिमन्त्रणम्:- ॐ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः। अपसर्पन्तु ते सर्वे कृतादस्माच्छिवाज्ञया ॥

सूत्रेण बन्धनम्:- ॐ येन राजा बलिर्बद्धः शतमी वीर्यो महाबलः। तेनत्वा त्वामूवे तिष्ठस्व माचल स्वाहा ॥

तिलाक्षतनिक्षिपणम्:- ॐ श्वेतपुष्पे महाश्वेते शुभे चन्दनगन्धिनि। त्वामोषधीं प्रपद्येहं त्राहि मां महतो भयात् ॥ माऽऽयत मसिं धत्ते तेजोवृद्धि व्यतिक्रमे ॥ अत्रैव तिष्ठ कल्याणि मम कार्ये करी भव। मम कार्ये कृते पश्चात् स्वर्गलोकं गमिष्यसि ॥ राक्षसानां पिशाचानां गुह्यकानां महौजसाम्। तेषां ब्रह्मनिरक्षुंधो येचान्ये परिपन्थिनः ॥ ॐ काणे मुरु चुरु मालिनि शङ्खे चक्रिके जगद्धात्रिनी क्षेमिनि मोहिनि नमोऽस्तु ते स्वाहा ॥ ॐ वीरजये स्वाहा ॥ ॐ महेन्द्राग्नि ब्रह्माणां ब्राह्मणानां गवामपि। तपसा तेजसाचैव प्रशाम्यध्वं शिवाय वै ॥

नमस्कारः- ॐ नमस्तेऽमृतसंभूते कल्पवीर्यविवर्द्धिनि। बलमायुश्च मे देहि पापान्मे त्राहि दूरतः ॥

खननम्:- ॐ येन त्वां खनते ब्रह्मा येन त्वां खनते भृगुः। येन होन्द्रोथ वज्रेणत्वामपरुरुक्षमे ॥ तेनाहं खनयिष्यामि मन्त्रपूतेन पाणिना। मा पाते मा भिरीतिते मातेजोन्यथा भवेत् ॥

उत्पाटनम्:- ॐ ह्रीं चण्डे हुं फट् स्वाहा। ॐ सर्वसिद्धि साधनीय स्वाहा। ॐ हुं ३ यें ३ सर्वसिद्धि साधनीय स्वाहा ॥ - ॥ एकवेलम्:- ॐ ह्रीं फट् स्वाहा ॥ ॥